M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 942

Title: Bhujang ...
Stotra

972

Complete

Bhujang Bhushan Stotra : Title

Shankaracharya : Author

: Editor

816 : Year, Vols.

: Publisher

972 : Remarks

श्रीगणेशायनमः सत्यंसत्यंपुनःसत्यंमुध्दृत्यभुजमुच्यते वेदशास्त्रात्परंनास्तिनदे
वंशंकरात्परं १ शंकरस्यचरिताःकथारसंचंद्रशेखरगुणानुकीर्त्तनं नीलकंठतव
पादसेवनंसंभवंतुममजन्मनिजन्मनि २ ॥ ॥अतिभीषणकटुभाषणयमकिं
करपटलीकरताडनपरिपीडनमरणागमसमये उमयासमहमचेतसियमशासन
निवसन्शिवशंकरशिवशंकरहरमेदुरितं १ अयंदानका० करचरणकृ० यत्कृ
त्यंतंनकृतंयदकृत्यंकृत्यवदाचरितं उभयोःप्रायश्चित्तंशिवशिवनामाक्षरद्वयो
च्चारितं २ संसारसर्पदष्टानांजंतूनामविवेकिनां चंद्रशेखरपादाब्जस्मरणंपर
मौषधं ३ रसनेरचितोयमंजलिस्तेपरनिंदापुरुषैरलंवचोभिः दुरितापह
रंनमःशिवायेत्यमुमादिमपंचाक्षरंजपमंत्रं ४ ॥यदादारुणाभीषणाभी
षणामेभविष्यंत्युपांतेकृतांतस्यदूताः तदामन्मनस्त्वत्पदांभोरुहस्थं कथं
निश्चल्यंलंस्यान्नमस्तेस्तुशंभो १ यदादुर्निवारंव्यथोहंरायानोलुठन्निःश्व

सन्निःस्ताव्यक्तवाणी तदा जन्हुकन्याजलालंकृतं मे जटामंडलं मन्मनो मं
दिरं स्यात् २ यदा पुत्रमित्रादयो मां स्वसकाशाद्रुदंति स्वगेहात्कीहरीयंद
शेलि ॥ तदा देवदेवेशगौरीशशंभो नमस्ते शिवायेत्यजस्रं ब्रवाणि ३
यदा पश्यतां मामसौ वेत्ति नास्मानयं श्वाससेवेत्तिवाचो भवेयुः तदा भूतिबाण
भुजंगावनद्धं पुरारे भवंतं स्फुटं भावयेहं ४ यदा रौरवादीन्स्मरन्नेव भीत्या
गमिष्यामि मोहं पतिष्यामि घोरं तदा तन्निरुद्धं कृतांतस्य मार्गं महादेव
मह्यं स्मरतिं तभयच्छ ५ यदा यातनादेहसंदेहघोहभवेदात्मदेहे तमोमां
हहंत्रे तदा काशशीतांशुसंकाशमीशं स्मरारे वपुस्ते नमस्ते स्मरामी ६
यदा पारमंत्यानमस्थायस्माज्जिगैर्नौश्चालीवीर्नगमिष्यामिदूरं तदामा
महोतातकस्तारयिष्यस्यमाकं न्थं पराधीनमर्धेंदुमौलैः यदाब्वेतपत्रा

यं तानलंघ्यशक्ते कृतांताह्वान्सक्किवात्सस्यमावात् । तदा पाहि मां पार्वतीवल्लभा
न्यं न पश्यामि पातारमेतादृशं मे ८ इदानीमिदानीं मृतिर्मे भवित्रीत्यहो सततं
चिंतयापीडितोस्मि · कथं नाम माभून्मृतौ भीतिरेषा नमस्ते गतीनां गते नीलकंठ
९ अमर्यादमेवाहमाबालवृद्धं हनंतं कृतांतं क्षमिष्यामिभीतं मतौ यावदस्यां
तवैवप्रसादाद्भवानीपतेनिर्भयोहं भवामि १० जराजन्मगर्भादिदुःखाधिव्या
धिसान्निसंख्यान्निजह्याजगन्नाथ केन भवंतं विनामे गतिर्नैव शंभो दयालो
[illegible]सि जागर्ति किं वादयाते ११ शिवायेति शब्दो नमः पूर्व एषः स्मरन्मुक्तिक
न्मृक्तिहा तत्त्ववाची ॥ ममेशो नु माभागान्म नस्तो वचस्तः सदा मह्यमेतत्प्रस
न्नः प्रयच्छ १२ त्वमप्येवं मां पश्यसीतांशुमौले प्रियं भेषजं त्वं भवव्याधिशां

भु० ये॥ बहुक्लेशभाजं नानांभोजनेत्रेभवल्लोगमानेनस्वाभुपारं १३ अकंठेअलं
२८ ॥ कौपाणौकपालादनं गेभुजंगादमालेकौक्षाल॥ अमौलौशशांकादहं
देवमन्यंनमन्येन मन्येनमन्येनमन्ये १४ किरीटेनिशीशोललाटेडुताशो
भुजेभोगिराजो गलेकालिमाच॥ अहं देवमन्यं महादेवसाम्यं न जाने०४।
१५ महादेवशंभो गिरीशत्रिशूलिन्त्वदीयं समस्तं विभातीतियस्मात्॥
शिवादन्यथादेवंनाभिजाने शिवोहं०४।१६ अयंदानकालस्त्वहंदानपात्रं
भवानेवदाता त्वदन्यं नयाचे॥ भवद्भक्तिमेवस्थिरां देहिमह्यं दयाशीलशंभो
भोकृतार्थोस्मियस्मात् १७ अनेनस्तवेनादरादंबिकेशंपरांभक्तिमातन्वतोयेनमंति॥ मृतौनिर्भयास्तेह्यनंतंलभंते हृदंभोजमध्ये सुदासीनमीशं। शिव. २
१८ भुजंगप्रयातंपठेद्यस्तुभक्त्यासमाधायचित्तेभवंतंपुरारिं॥ समो

हं विहायाशुयुष्मत्प्रसादात्समाश्रित्ययोगं व्रजत्यच्युतत्वं १९॥ ॥इति
श्रीमत्प० श्रीमच्छंकराचार्य विरचितं भुजंगप्रयातस्तोत्रं समाप्तं॥
॥ ॥ श्रीसत्तकोटीश्वरार्पणमस्तु॥ ॥ सलोमुदेऽस्तु॥ ॥
॥ ॥ॐ नमः शिवाय॥ ॥ विकारीसंवत्सरेमार्गशीर्षव॥६७ बुधे
तद्दिनेचसमाप्तं॥ ॥हिमाबाएमासिगिपत्॥ ॥श्रीरस्तु॥ ॥